चोदकः-दिका, चुचोदयिषकः-षिका ; चोदयिता-त्री, चुचोदयिषिता-त्री ; चोदयन्-न्ती, [[1]माणवकमर्थं] चोदयन्, चुचोदयिषन्-न्ती ; चोदयिष्यन्-न्ती-ती, चुचोदयिषिष्यन्-न्ती-ती, चोदयमानः, चुचोदयिषमाणः; चोदयिष्यमाणः, चुचोदयिषिष्यमाणः ; [2]प्रचोत्-प्रचोदौ-प्रचोदः ; चोदितम्-तः, चुचोदयिषितः-तवान् ; चोदः, चुचोदयिषुः ; चोदयितव्यम्, चुचोदयिषितव्यम् ; चोदनीयम्, चुचोदयिषणीयम् ; चोद्यम्, चुचोदयिष्यम् ; ईषच्चोदः-दुश्चोदः-सुचोदः ;— चोद्यमानः, चुचोदयिष्यमाणः ; चोदः, चुचोदयिषः; चोदयितुम्, चुचोदयिषितुम् ; [A]चोदना, [3]चूडा, चुचोदयिषा; चोदनम्, चुचोदयिषणम्; चोदयित्वा, चुचोदयिषित्वा; प्रचोद्य, [B]परिचोद्य, प्रचुचोदयिष्य ; चोदम् २-चोदयित्वा २, चुचोदयिषम् २-चुचोदयिषित्वा २.

## (543) "चुप मन्दायां गतौ" (I-भ्वादिः-403. अक. सेट्. पर.)

'स्पर्शे चुपति, मन्दायां गतौ तु शपि चोपति ।' (श्लो. 138) इति देवः । चोपकः-पिका, चोपकः-पिका, चुचोपिषकः-चुचुपिषकः-षिका, चोचुपकः-पिका; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककुचतिवत् (200) ज्ञेयानि । [4]गले-

---

1. 'अकथितं च' (1-4-51) इत्यनेन माणवकस्य कर्मसंज्ञा । न चात्र कृद्योगलक्षणा षष्ठी शङ्क्या; 'न लोकाव्ययनिष्ठाखलर्थतृनाम्' (2-3-69) इति षष्ठीनिषेधात् ।
2. णिनिमित्तको गुणः ।
3. 'भिदादिषु (3-3-104) निपातनात् धातोरुपधाया दीर्घः, दकारस्य डकारः णिलोपश्च भवति' इति माधवधातुवृत्तिः । 'अबाधकान्यपि निपातनानि' (परिभाषा-118) इति वचनात् 'चोदना' इत्यपि साधुः ।
4. गले चोप्यते इति, 'कृत्यल्युटो बहुलम्' (3-3-113) इति ण्यन्तादस्मात् कर्मणि ण्वुल् । 'कर्तृकरणे कृता बहुलम्' (2-1-32) इति बहुलग्रहणात् सप्तम्यन्तस्यापि समासः । 'तत्पुरुषे कृति बहुलम्' (6-3-14) इति, 'अमूर्धमस्तकात् स्वाङ्गादकामे' (6-3-12) इति वा सप्तम्या अलुक् ।

A. 'कर्मचोदनया जीवः कायमन्यमिवेन्द्रियैः ॥' भारतचम्पूः (2-18)

B. 'संबुस्तिते गिरिमखे परिचोद्य गोपान्
प्रानक्षयद्धरिमखं मदधक्कनार्थी ॥' धा. का. 3. 20.